# ShastrishavarNa sahasranAmastotram

# શાસ્તૃશવર્ણસહસ્રનામસ્તોત્રમ્

## Document Information

```
Text title : shAstRRishavarNasahasranAmastotram
File name : shAstRRishavarNasahasranAmastotram.itx
Category : deities_misc, ayyappa, sahasranAma
Location : doc_deities_misc
Transliterated by : Sivakumar Thyagarajan Iyer shivakumar24 at gmail.com
Proofread by : Sivakumar Thyagarajan Iyer, PSA Easwaran
Latest update : July 10, 2021
Send corrections to : sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2021

*sanskritdocuments.org*

# શાસ્તૃશવર્ણસહસ્રનામસ્તોત્રમ્

॥ શ્રીઃ ॥

અસ્ય શ્રીશાસ્તૃશવર્ણસહસ્રનામસ્તોત્રમહામન્ત્રસ્ય
નૈધ્રુવ ઋષિઃ, અનુષ્ટુપ્છન્દઃ, શાસ્તા દેવતા ।
ૐ ભૂતાધિપાય વિદ્મહે ઇતિ બીજમ્ ।
ૐ મહાદેવાય ધીમહિ ઇતિ શક્તિઃ ।
ૐ તન્નઃ શાસ્તા પ્રચોદયાત્ ઇતિ કીલકમ્ ।
સાધકાભીષ્ટસાધને પૂજને વિનિયોગઃ ।
ૐ હ્રાં ભૂતાધિપાય વિદ્મહે અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ હ્રીં મહાદેવાય ધીમહિ તર્જનીભ્યાં નમઃ ।
ૐ હ્રૂં તન્નઃ શાસ્તા પ્રચોદયાત્ મધ્યમાભ્યાં નમઃ ।
ૐ હ્રૈં તન્નઃ શાસ્તા પ્રચોદયાત્ અનામિકાભ્યાં નમઃ ।
ૐ હ્રૌં મહાદેવાય ધીમહિ કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ હ્રઃ ભૂતાધિપાય વિદ્મહે કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
એવં હૃદયાદિન્યાસઃ ।
ધ્યાનં -
શ્રીશોમેશાત્મપુત્રં શ્રિતજનવરદં શ્લાઘનીયાપદાનં
ક્લેશોદ્ભ્રાન્તિપ્રણાશં ક્લિશિતરિપુચયં ક્લેદસઙ્કાશમાત્રમ્ ।
કોશોચ્ચાશ્વાધિરૂઢં પરિગતમૃગયાખેલનાનન્દચિત્તં
પાશોચ્ચણ્ડાસ્ત્રપાણિં વરદમભયદં સ્તૌમિ શાસ્તારમીશમ્ ॥

ૐ શન્નો દાતા શમ્ભૃતાઙ્ગઃ શન્તનુઃ શન્તનુસ્તુતઃ ।
શંવાચ્યઃ શઙ્કૃતિપ્રીતઃ શન્દઃ શાન્તનવસ્તુતઃ ॥ ૧॥

શઙ્કરઃ શઙ્કરી શમ્ભુઃ શમ્ભૂર્વૈ શમ્ભુવલ્લભઃ ।
શંસઃ શંસ્થાપતિઃ શંસ્યઃ શંસિતઃ શઙ્કરપ્રિયઃ ॥ ૨॥

શંયુઃ શઙ્ખઃ શમ્ભવોઽપિ શંસાપાત્રં શકેડિતઃ ।

શકટઘ્નાર્ચિતઃ શક્તઃ શકારિપરિપૂજિતઃ ॥ ૩॥

શકુનઙ્ગઃ શકુનદઃ શકુનીશ્વરપાલકઃ ।
શકુનારૂઢવિનુતઃ શકટાસુફલ (પ્રદઃ) પ્રિયઃ ॥ ૪॥

શકુન્તેશાત્મજસ્તુત્યઃ શકલાક્ષકયુગ્રથઃ ।
શકૃત્કરિસ્તોમપાલઃ શક્વરીચ્છન્દઈડિતઃ ॥ ૫॥

શક્તિમાન્ શક્તિભૃદ્ભક્તઃ શક્તિભૃચ્છક્તિહેતિકઃ ।
શક્તઃ શક્રસ્તુતઃ શક્યઃ શક્રગોપતનુચ્છવિઃ ॥ ૬॥

શક્રજાયાભીષ્ટદાતા શક્રસારથિરક્ષકઃ ।
શક્રાણીવિનુતઃ શક્લઃ શક્રોત્સવસમાતૃકઃ ॥ ૭॥

શક્વરધ્વજસમ્પ્રાપ્તબલૈશ્વર્યવિરાજિતઃ ।
શક્રોત્થાનક્રિયારમ્ભબલિપૂજાપ્રમોદિતઃ ॥ ૮॥

શઙ્કુઃ શઙ્કાવિરહિતઃ શઙ્કરીચિત્તરઞ્જકઃ ।
શઙ્કરાવાસધૌરેયઃ શઙ્કરાલયભોગદઃ ॥ ૯॥

શઙ્કરાલઙ્કૃતદરઃ શઙ્ખી શઙ્ખનિધીશ્વરઃ ।
શઙ્ખધ્મઃ શઙ્ખભૃચ્છઙ્ખનખઃ શઙ્ખજભૂષણઃ ॥ ૧૦॥

શઙ્ખાસ્યઃ શઙ્ખિનીલોલઃ શઙ્ખિકઃ શઙ્ખભૃત્પ્રિયઃ ।
શચીવિરહવિધ્વસ્તઃ શચીપતિવિનોદદઃ ॥ ૧૧॥

શટીગન્ધઃ શટાજૂટઃ શઠમૂલકૃતાદરઃ ।
શઠપુષ્પધરઃ શસ્તા શઠાત્મકનિબર્હણઃ ॥ ૧૨॥

શણસૂત્રધરઃ શાણી શાણ્ડિલ્યાદિમુનિસ્તુતઃ ।
શતકીર્તિઃ શતધૃતિઃ શતકુન્દસુમપ્રિયઃ ॥ ૧૩॥

શતકુમ્ભાદ્રિનિલયઃ શતક્રતુજયપ્રદઃ ।
શતદ્રુતટસઞ્ચારી શતકણ્ઠસમદ્યુતિઃ ॥ ૧૪॥

શતવીર્યઃ શતબલઃ શતાઙ્ગી શતવાહનઃ ।
શત્રુઘ્નઃ શત્રુઘ્નનુતઃ શત્રુજિચ્છત્રુવઞ્ચકઃ ॥ ૧૫॥

શલાલુકન્ધરધરઃ શનિપીડાહરઃ શિખી ।
શનિપ્રદોષસઞ્જાતસ્વભક્તભરણોત્સુકઃ ॥ ૧૬॥

શન્યર્ચિતઃ શનિત્રાણઃ શન્યનુગ્રહકારકઃ ।
શબરાખેટનરતઃ શપથઃ શપથક્ષણઃ ॥ ૧૭॥

શબ્દનિષ્ઠઃ શબ્દવેદી શમી શમધનસ્તુતઃ ।
શમીગર્ભપ્રિયઃ શમ્બઃ શમ્બરારિસહોદરઃ ॥ ૧૮॥

શયણ્ડવિમુખઃ શણ્ડી શરણાગતરક્ષકઃ ।
શરજન્મપ્રાણસખઃ શરજન્મસહોદરઃ ॥ ૧૯॥

શરજન્માનુસરણઃ શરજન્મચમૂપતિઃ ।
શરજન્મામાત્યવર્યઃ શરજન્મપ્રિયઙ્કરઃ ॥ ૨૦॥

શરજન્મગણાધીશઃ શરજન્માશ્રયાધરઃ ।
શરજન્માગ્રસઞ્ચારી શરાસનધરઃ શરી ॥ ૨૧॥

શરારુઘ્નઃ શર્કુરેષ્ટઃ શર્મદઃ શર્મવિગ્રહઃ ।
શર્યાતિજયદઃ શસ્ત્રી શશભૃદ્ભૂષનન્દનઃ ॥ ૨૨॥

શશ્વદ્બલાનુકૂલોઽપિ શષ્કુલીભક્ષણાદરઃ ।
શસ્તઃ શસ્તવરઃ શસ્તકેશકઃ શસ્તવિગ્રહઃ ॥ ૨૩॥

શસ્ત્રાઢ્યઃ શસ્ત્રભૃદ્દેવઃ શસ્ત્રક્રીડાકુતૂહલઃ ।
શસ્યાયુધઃ શાર્ઙ્ગપાણિઃ શાર્ઙ્ગિસ્ત્રીપ્રિયનન્દનઃ ॥ ૨૪॥

શાકપ્રિયઃ શાકદેવઃ શાકટાયનસંસ્તુતઃ ।
શાક્તધર્મરતઃ શાક્તઃ શાક્તિકઃ શાક્તરઞ્જકઃ ॥ ૨૫॥

શાકિનીડાકિનીમુખ્યયોગિનીપરિસેવિતઃ ।
તથા શાડ્વલનાથશ્ચ શાઠ્યકર્મરતાહિતઃ ॥ ૨૬॥

શાણ્ડિલ્યગોત્રવરદઃ શાન્તાત્મા શાતપત્રકઃ ।
શાતકુમ્ભસુમપ્રીતઃ શાતકુમ્ભજટાધરઃ ॥ ૨૭॥

શાતોદરપ્રભઃ શાભઃ શાડ્વલક્રીડનાદરઃ ।
શાનપાદારસઞ્ચારી શાત્રવાન્વયમર્દનઃ ॥ ૨૮॥

શાન્તઃ શાન્તનિધિઃ શાન્તિઃ શાન્તાત્મા શાન્તિસાધકઃ ।
શાન્તિકૃચ્છાન્તિકુશલઃ શાન્તધીઃ શાન્તવિગ્રહઃ ॥ ૨૯॥

શાન્તિકામઃ શાન્તિપતિઃ શાન્તીડ્યઃ શાન્તિવાચકઃ ।
શાન્તસ્તુતઃ શાન્તનુતઃ શાન્તેડ્યઃ શાન્તપૂજિતઃ ॥ ૩૦॥

શાપાસ્ત્રઃ શાપકુશલઃ શાપાયુધસુપૂજિતઃ ।
શાપઘ્નઃ શાપદીનેડ્યઃ શાપદ્વિટ્ શાપનિગ્રહઃ ॥ ૩૧॥

શાપાર્જિતઃ શાકટિકવાહપ્રીતશ્ચ શામિની ।
શાબ્દિકઃ શાબ્દિકનુતઃ શાબ્દબોધપ્રદાયકઃ ॥ ૩૨॥

શામ્બરાગમવેદી ચ શામ્બરઃ શામ્બરોત્સવઃ ।
શામિનીદિગ્વિહારોઽથ શામિત્રગણપાલકઃ ॥ ૩૩॥

શામ્ભવઃ શામ્ભવારાધ્યઃ શામિલાલેપનાદરઃ ।
શામ્ભવેષ્ટઃ શામ્ભવાઢ્યઃ શામ્ભવી શમ્ભુપૂજકઃ ॥ ૩૪॥

શારભ્રૂઃ શારદઃ શારી શારદાનિવહદ્યુતિઃ ।
શારદેડ્યઃ શારદીષ્ટઃ શારિસ્થઃ શારુકાન્તકઃ ॥ ૩૫॥

શાર્કુખાદી શાર્કુરેષ્ટઃ શારીરમલમોચકઃ ।
શાર્ઙ્ગી શાર્ઙ્ગિસુતઃ શાર્ઙ્ગિપ્રીતઃ શાર્ઙ્ગિપ્રિયાદરઃ ॥ ૩૬॥

શાર્દૂલાક્ષઃ શાર્વરાભઃ શાર્વરીપ્રિયશેખરઃ ।
શાલઙ્કીડ્યઃ શાલવાભઃ શાલકામાર્ચકાદરઃ ॥ ૩૭॥

શાશ્વતઃ શાશ્વતૈશ્વર્યઃ શાસિતા શાસનાદરઃ ।
શાસ્ત્રજ્ઞઃ શાસ્ત્રતત્ત્વજ્ઞઃ શાસ્ત્રદર્શી ચ શાસ્ત્રવિત્ ॥ ૩૮॥

શાસ્ત્રચક્ષુઃ શાસ્ત્રકર્ષી (કુક્ષી) શાસ્ત્રકૃચ્છાસ્ત્રચારણઃ ।
શાસ્ત્રી શાસ્ત્રપ્રતિષ્ઠાતા શાસ્ત્રાર્થઃ શાસ્ત્રપોષકઃ ॥ ૩૯॥

શાસ્ત્રહેતુઃ શાસ્ત્રસેતુઃ શાસ્ત્રકેતુશ્ચ શાસ્ત્રભૂઃ ।
શાસ્ત્રાશ્રયઃ શાસ્ત્રગેયઃ શાસ્ત્રકારશ્ચ શાસ્ત્રદૃક્ ॥ ૪૦॥

શાસ્ત્રાઙ્ગઃ શાસ્ત્રપૂજ્યશ્ચ શાસ્ત્રગ્રથનલાલસઃ ।
શાસ્ત્રપ્રસાધકઃ શાસ્ત્રજ્ઞેયઃ શાસ્ત્રાર્થપણ્ડિતઃ ॥ ૪૧॥

શાસ્ત્રપારઙ્ગતઃ શાસ્ત્રગુણવિચ્છાસ્ત્રશોધકઃ ।
શાસ્ત્રકૃદ્વરદાતા ચ શાસ્ત્રસન્દર્ભબોધકઃ ॥ ૪૨॥

શાસ્ત્રકૃત્પૂજિતઃ શાસ્ત્રકરઃ શાસ્ત્રપરાયણઃ ।
શાસ્ત્રાનુરક્તઃ શાસ્ત્રાત્મા શાસ્ત્રસન્દેહભઞ્જકઃ ॥ ૪૩॥

શાસ્ત્રનેતા શાસ્ત્રપૂતઃ શાસ્ત્રયોનિશ્ચ શાસ્ત્રહૃત્ ।

શાસ્ત્રલોલઃ શાસ્ત્રપાલઃ શાસ્ત્રકૃત્પરિરક્ષકઃ ॥ ૪૪॥

શાસ્ત્રધર્મઃ શાસ્ત્રકર્મા શાસ્ત્રશીલશ્ચ શાસ્ત્રનુત્ ।
શાસ્ત્રદૃષ્ટિઃ શાસ્ત્રપુષ્ટિઃ શાસ્ત્રતુષ્ટિશ્ચ શાસ્ત્રચિત્ ॥ ૪૫॥

શાસ્ત્રશુદ્ધિઃ શાસ્ત્રબુદ્ધિઃ શાસ્ત્રધીઃ શાસ્ત્રવર્ધનઃ ।
શાસ્ત્રપ્રજ્ઞઃ શાસ્ત્રવિજ્ઞઃ શાસ્ત્રાર્થી શાસ્ત્રમણ્ડલઃ ॥ ૪૬॥

શાસ્ત્રસ્પૃક્ શાસ્ત્રનિપુણઃ શાસ્ત્રસૃક્ શાસ્ત્રમઙ્ગલઃ ।
શાસ્ત્રધીરઃ શાસ્ત્રશૂરઃ શાસ્ત્રવીરશ્ચ શાસ્ત્રસત્ ॥ ૪૭॥

શાસ્ત્રાધિપઃ શાસ્ત્રદેવઃ શાસ્ત્રક્રીડોઽથ શાસ્ત્રરાટ્ ।
શાસ્ત્રાઢ્યઃ શાસ્ત્રસારજ્ઞઃ શાસ્ત્રં શાસ્ત્રપ્રદર્શકઃ ॥ ૪૮॥

શાસ્ત્રપ્રૌઢઃ શાસ્ત્રરૂઢઃ શાસ્ત્રગૂઢશ્ચ શાસ્ત્રપઃ ।
શાસ્ત્રધ્યાનઃ શાસ્ત્રગુણઃ શાસ્ત્રેશાનશ્ચ શાસ્ત્રભૂઃ ॥ ૪૯॥

શાસ્ત્રજ્યેષ્ઠઃ શાસ્ત્રનિષ્ઠઃ શાસ્ત્રશ્રેષ્ઠશ્ચ શાસ્ત્રરુક્ ।
શાસ્ત્રત્રાતા શાસ્ત્રભર્તા શાસ્ત્રકર્તા ચ શાસ્ત્રમુત્ ॥ ૫૦॥

શાસ્ત્રધન્યઃ શાસ્ત્રપુણ્યઃ શાસ્ત્રગણ્યશ્ચ શાસ્ત્રધીઃ ।
શાસ્ત્રસ્ફૂર્તિઃ શાસ્ત્રમૂર્તિઃ શાસ્ત્રકીર્તિશ્ચ શાસ્ત્રભૃત્ ॥ ૫૧॥

શાસ્ત્રપ્રિયઃ શાસ્ત્રજાયઃ શાસ્ત્રોપાયશ્ચ શાસ્ત્રગીઃ ।
શાસ્ત્રાધારઃ શાસ્ત્રચરઃ શાસ્ત્રસારશ્ચ શાસ્ત્રધુક્ ॥ ૫૨॥

શાસ્ત્રપ્રાણઃ શાસ્ત્રગણઃ શાસ્ત્રત્રાણશ્ચ શાસ્ત્રભાક્ ।
શાસ્ત્રનાથઃ શાસ્ત્રરથઃ શાસ્ત્રસેનશ્ચ શાસ્ત્રદઃ ॥ ૫૩॥

શાસ્ત્રસ્વામી શાસ્ત્રભૂમા શાસ્ત્રકામી ચ શાસ્ત્રભુક્ ।
શાસ્ત્રપ્રખ્યઃ શાસ્ત્રમુખ્યઃ શાસ્ત્રવિખ્યોઽથ શાસ્ત્રવાન્ ॥ ૫૪॥

શાસ્ત્રવર્ણઃ શાસ્ત્રપૂર્ણઃ શાસ્ત્રકર્ણોઽથ શાસ્ત્રપુટ્ ।
શાસ્ત્રભોગઃ શાસ્ત્રયોગઃ શાસ્ત્રભાગશ્ચ શાસ્ત્રયુક્ ॥ ૫૫॥

શાસ્ત્રોજ્જ્વલઃ શાસ્ત્રબાલઃ શાસ્ત્રનામા ચ શાસ્ત્રભુક્ ।
શાસ્ત્રશ્રીઃ શાસ્ત્રસન્તુષ્ટઃ શાસ્ત્રોક્તઃ શાસ્ત્રદૈવતમ્ ॥ ૫૬॥

શાસ્ત્રમૌલિઃ શાસ્ત્રકેલિઃ શાસ્ત્રપાલિશ્ચ શાસ્ત્રમુક્ ।
શાસ્ત્રરાજ્યઃ શાસ્ત્રભોજ્યઃ શાસ્ત્રેજ્યઃ શાસ્ત્રયાજકઃ ॥ ૫૭॥

શાસ્ત્રસૌખ્યઃ શાસ્ત્રવિભુઃ શાસ્ત્રપ્રેષ્ઠશ્ચ શાસ્ત્રજુટ્ ।
શાસ્ત્રવીર્યઃ શાસ્ત્રકાર્યઃ શાસ્ત્રાર્હઃ શાસ્ત્રતત્પરઃ ॥ ૫૮॥

શાસ્તગ્રાહી શાસ્ત્રવહઃ શાસ્ત્રાક્ષઃ શાસ્ત્રકારકઃ ।
શાસ્ત્રશ્રીદઃ શાસ્ત્રદેહઃ શાસ્ત્રશેષશ્ચ શાસ્ત્રત્વિટ્ ॥ ૫૯॥

શાસ્ત્રહ્લાદી શાસ્ત્રકલઃ શાસ્ત્રરશ્મિશ્ચ શાસ્ત્રધીઃ ।
શાસ્ત્રસિન્ધુઃ શાસ્ત્રબન્ધુઃ શાસ્ત્રયત્નશ્ચ શાસ્ત્રભિત્ ॥ ૬૦॥

શાસ્ત્રપ્રદર્શી શાસ્ત્રેષ્ટઃ શાસ્ત્રભૂષશ્ચ શાસ્ત્રગઃ ।
શાસ્ત્રસઙ્ઘઃ શાસ્ત્રસખસ્તથા શાસ્ત્રવિશારદઃ ॥ ૬૧॥

શાસ્ત્રપ્રીતઃ શાસ્ત્રહિતઃ શાસ્ત્રપૂતોઽથ શાસ્ત્રકૃત્ ।
શાસ્ત્રમાલી શાસ્ત્રયાયી શાસ્ત્રીયઃ શાસ્ત્રપારદૃક્ ॥ ૬૨॥

શાસ્ત્રસ્થાયી શાસ્ત્રચારી શાસ્ત્રગીઃ શાસ્ત્રચિન્તનઃ ।
શાસ્ત્રધ્યાનઃ શાસ્ત્રગાનઃ શાસ્ત્રાલી શાસ્ત્રમાનદઃ ॥ ૬૩॥

શિક્યપાલઃ શિક્યરક્ષઃ શિખણ્ડી શિખરાદરઃ ।
શિખરં શિખરીન્દ્રસ્થઃ શિખરીવ્યૂહપાલકઃ ॥ ૬૪॥

શિખરાવાસનપ્રીતઃ શિખાવલવશાદૃતઃ ।
શિખાવાન્શિખિમિત્રશ્ચ શિખીડ્યઃ શિખિલોચનઃ ॥ ૬૫॥

શિખાયોગરતઃ શિગ્રુપ્રીતઃ શિગ્રુજખાદનઃ ।
શિગ્રુજેક્ષુરસાનન્દઃ શિખિપ્રીતિકૃતાદરઃ ॥ ૬૬॥

શિતઃ શિતિઃ શિતિકણ્ઠાદરશ્ચ શિતિવક્ષરુક્ ।
શિઞ્જઞ્જિકાહેમકાન્તિવસ્ત્રઃ શિઞ્જિતમણ્ડિતઃ ॥ ૬૭॥

શિથિલારિગણઃ શિઞ્જી શિપિવિષ્ટપ્રિયઃ શિફી ।
શિબિપ્રિયઃ શિબિનુતઃ શિબીડ્યશ્ચ શિબિસ્તુતઃ ॥ ૬૮॥

શિબિકષ્ટહરઃ શિવ્યાશ્રિતશ્ચ શિબિકાપ્રિયઃ ।
શિબિરી શિબિરત્રાણઃ શિબિરાલયવલ્લભઃ ॥ ૬૯॥

શિબિવલ્લભસત્પ્રેમા શિરાફલજલાદરઃ ।
શિરજાલકૃતશિરાઃ શિરસ્ત્રાણવિભૂષિતઃ ॥ ૭૦॥

શિરોરત્નપ્રતીકાશઃ શિરોવેષ્ટનશોભિતઃ ।
શિલાદસંસ્તુતઃ શિલ્પી શિવદશ્ચ શિવઙ્કરઃ ॥ ૭૧॥

શિવઃ શિવાત્મા શિવભૂઃ શિવકૃચ્છિવશેખરઃ ।
શિવજ્ઞઃ શિવકર્મજ્ઞઃ શિવધર્મવિચારકઃ ॥ ૭૨॥

શિવજન્મા શિવાવાસઃ શિવયોગી શિવાસ્પદઃ ।
શિવસ્મૃતિઃ શિવધૃતિઃ શિવાર્થઃ શિવમાનસઃ ॥ ૭૩॥

શિવાઢ્યઃ શિવવર્યજ્ઞઃ શિવાર્થઃ શિવકીર્તનઃ ।
શિવેશ્વરઃ શિવારાધ્યઃ શિવાધ્યક્ષઃ શિવપ્રિયઃ ॥ ૭૪॥

શિવનાથઃ શિવસ્વામી શિવેશઃ શિવનાયકઃ ।
શિવમૂર્તિઃ શિવપતિઃ શિવકીર્તિઃ શિવાદરઃ ॥ ૭૫॥

શિવપ્રાણઃ શિવત્રાણઃ શિવત્રાતા શિવાઙ્કકઃ ।
શિવપશ્ચ શિવક્રીડઃ શિવદેવઃ શિવાધિપઃ ॥ ૭૬॥

શિવજ્યેષ્ઠઃ શિવશ્રેષ્ઠઃ શિવપ્રેષ્ઠઃ શિવાધિરાટ્ ।
શિવરાટ્ શિવગોપ્તા ચ શિવાઙ્ગઃ શિવદૈવતઃ ॥ ૭૭॥

શિવબન્ધુઃ શિવસુહૃચ્છિવાધીશઃ શિવપ્રદઃ ।
શિવાગ્રણીઃ શિવેશાનઃ શિવગીતઃ શિવોચ્છ્રયઃ ॥ ૭૮॥

શિવસ્ફૂર્તિઃ શિવસુતઃ શિવપ્રૌઢઃશિવોધતઃ ।
શિવસેનઃ શિવચરઃ શિવભર્તા શિવપ્રભુઃ ॥ ૭૯॥

શિવૈકરાટ્ શિવપ્રજ્ઞઃ શિવસારઃ શિવસ્પૃહઃ ।
શિવગ્રીવઃ શિવનામા શિવભૂતિઃ શિવાન્તરઃ ॥ ૮૦॥

શિવમુખ્યઃ શિવપ્રખ્યઃ શિવવિખ્યઃ શિવાખ્યગઃ ।
શિવધ્યાતા શિવોદ્ગાતા શિવદાતા શિવસ્થિતિઃ ॥ ૮૧॥

શિવાનન્દઃ શિવમતિઃ શિવાર્હઃ શિવતત્પરઃ ।
શિવભક્તઃ શિવાસક્તઃ શિવશક્તઃ શિવાત્મકઃ ॥ ૮૨॥

શિવદૃક્ શિવસમ્પન્નઃ શિવહૃચ્છિવમણ્ડિતઃ ।
શિવભાક્ શિવસન્ધાતા શિવશ્લાઘી શિવોત્સુકઃ ॥ ૮૩॥

શિવશીલઃ શિવરસઃ શિવલોલઃ શિવોત્કટઃ ।
શિવલિઙ્ગઃ શિવપદઃ શિવસન્ધઃ શિવોજ્જ્વલઃ ॥ ૮૪॥

શિવશ્રીદઃ શિવકલઃ શિવમાન્યઃ શિવપ્રદઃ ।

શિવવ્રતઃ શિવહિતઃ શિવપ્રીતઃ શિવાશયઃ ॥ ૮૫॥

શિવનિષ્ઠઃ શિવજપઃ શિવસંજ્ઞઃ શિવોર્જિતઃ ।
શિવમાનઃ શિવસ્થાનઃ શિવગાનઃ શિવોપમઃ ॥ ૮૬॥

શિવાનુરક્તઃ શિવહૃચ્છિવહેતુઃ શિવાર્ચકઃ ।
શિવકેલિઃ શિવવટુઃ શિવચાટુઃ શિવાસ્રવિત્ ॥ ૮૭॥

શિવસઙ્ગઃ શિવધરઃ શિવભાવઃ શિવાર્થકૃત્ ।
શિવલીલઃ શિવસ્વાન્તઃ શિવેચ્છઃ શિવદાયકઃ ॥ ૮૮॥

શિવશિષ્યઃ શિવોપાયઃ શિવેષ્ટઃ શિવભાવનઃ ।
શિવપ્રધીઃ શિવવિભુઃ શિવાભીષ્ટઃ શિવધ્વજઃ ॥ ૮૯॥

શિવવાન્ શિવસમ્મોહઃ શિવર્ધિઃ શિવસમ્ભ્રમઃ ।
શિવશ્રીઃ શિવસઙ્કલ્પઃ શિવગાત્રઃ શિવોક્તિદઃ ॥ ૯૦॥

શિવવેષઃ શિવોત્કર્ષઃ શિવભાષઃ શિવોત્સુકઃ ।
શિવમૂલઃ શિવાપાલઃ શિવશૂલઃ શિવાબલઃ ॥ ૯૧॥

શિવાચારઃ શિવાકારઃ શિવોદારઃ શિવાકરઃ ।
શિવહૃષ્ટઃ શિવોદ્દિષ્ટઃ શિવતુષ્ટઃ શિવેષ્ટદઃ ॥ ૯૨॥

શિવડિમ્ભઃ શિવારમ્ભઃ શિવોજ્જૃમ્ભઃ શિવાભરઃ ।
શિવમાયઃ શિવચયઃ શિવદાયઃ શિવોચ્છ્રયઃ ॥ ૯૩॥

શિવવ્યૂહઃ શિવોત્સાહઃ શિવસ્નેહઃ શિવાવહઃ ।
શિવલોકઃ શિવાલોકઃ શિવૌકાઃ શિવસૂચકઃ ॥ ૯૪॥

શિવબુદ્ધિઃ શિવર્ધિશ્ચ શિવસિદ્ધિઃ શિવર્ધિદઃ ।
શિવધીઃ શિવસંશુદ્ધિઃ શિવધીઃ શિવસિદ્ધિદઃ ॥ ૯૫॥

શિવનામા શિવપ્રેમા શિવભૂઃ શિવવિત્તમઃ ।
શિવાવિષ્ટઃ શિવાદિષ્ટઃ શિવાભીષ્ટઃ શિવેષ્ટકૃત્ ॥ ૯૬॥

શિવસેવી શિવકવિઃ શિવખ્યાતઃ શિવચ્છવિઃ ।
શિવલીનઃ શિવચ્છન્નઃ શિવધ્યાનઃ શિવસ્વનઃ ॥ ૯૭॥

શિવપાલઃ શિવસ્થૂલઃ શિવજાલઃ શિવાલયઃ ।
શિવાવેશઃ શિવોદ્દેશઃ શિવાદેશઃ શિવોદ્યતઃ ॥ ૯૮॥

શિવપક્ષઃ શિવાધ્યક્ષઃ શિવરક્ષઃ શિવેક્ષણઃ ।
શિવપદ્યઃ શિવોદ્વિદ્યઃ શિવહૃદ્યઃ શિવાદ્યકઃ ॥ ૯૯॥

શિવપાદ્યઃ શિવસ્વાદ્યઃ શિવાર્ધ્યઃ શિવપાદ્યકઃ ।
શિવાર્હઃ શિવહાર્દશ્ચ શિવબિમ્બઃ શિવાર્ભકઃ ॥ ૧૦૦॥

શિવમણ્ડલમધ્યસ્થઃ શિવકેલિપરાયણઃ ।
શિવામિત્રપ્રમથનઃ શિવભક્તાર્તિનાશનઃ ॥ ૧૦૧॥

શિવભક્તિપ્રિયરતઃ શિવપ્રવણમાનસઃ ।
શિવવાલ્લભ્યપુષ્ટાઙ્ગઃ શિવારિહરણોત્સુકઃ ॥ ૧૦૨॥

શિવાનુગ્રહસન્ધાતા શિવપ્રણયતત્પરઃ ।
શિવપાદાબ્જલોલમ્બઃ શિવપૂજાપરાયણઃ ॥ ૧૦૩॥

શિવકીર્તનસન્તુષ્ટઃ શિવોલ્લાસક્રિયાદરઃ ।
શિવાપદાનચતુરઃ શિવકાર્યાનુકૂલદઃ ॥ ૧૦૪॥

શિવપુત્રપ્રીતિકરઃ શિવાશ્રિતગણેષ્ટદઃ ।
શિવમૂર્ધાભિષિક્તાઙ્ગઃ શિવસૈન્યપુરઃસરઃ ॥ ૧૦૫॥

શિવવિશ્વાસસમ્પૂર્ણઃ શિવપ્રમથસુન્દરઃ ।
શિવલીલાવિનોદજ્ઞઃ શિવવિષ્ણુમનોહરઃ ॥ ૧૦૬॥

શિવપ્રેમાર્દ્રદિવ્યાઙ્ગઃ શિવવાગમૃતાર્થવિત્ ।
શિવપૂજાગ્રગણ્યશ્ચ શિવમઙ્ગલચેષ્ટિતઃ ॥ ૧૦૭॥

શિવદૂષકવિધ્વંસી શિવાજ્ઞાપરિપાલકઃ ।
શિવસંસારશૃઙ્ગારઃ શિવજ્ઞાનપ્રદાયકઃ ॥ ૧૦૮॥

શિવસ્થાનધૃતોદ્દણ્ડઃ શિવયોગવિશારદઃ ।
શિવપ્રેમાસ્પદોચ્ચણ્ડદણ્ડનાડમ્બરોદ્ભટઃ ॥ ૧૦૯॥

શિવાર્ચકપરિત્રાતા શિવભક્તિપ્રદાયકઃ ।
શિવધ્યાનૈકનિલયઃ શિવધર્મપરાયણઃ ॥ ૧૧૦॥

શિવસ્મરણસાન્નિધ્યઃ શિવાનન્દમહોદરઃ ।
શિવપ્રસાદસન્તુષ્ટઃ શિવકૈવલ્યમૂલકઃ ॥ ૧૧૧॥

શિવસઙ્કીર્તનોલ્લાસઃ શિવકૈલાસભોગદઃ ।
શિવપ્રદોષપૂજાત્તસર્વસૌભાગ્યસુન્દરઃ ॥ ૧૧૨॥

શિવલિઙ્ગાર્ચનાસક્તઃ શિવનામસ્મૃતિપ્રદઃ ।
શિવાલયસ્થાપકશ્ચ શિવાદ્રિક્રીડનોત્સુકઃ ॥ ૧૧૩॥

શિવાપદાનનિપુણઃ શિવવાક્પરિપાલકઃ ।
શિવાનીપ્રીતિકલશઃ શિવારાતિવિનાશકઃ ॥ ૧૧૪॥

શિવાત્મકક્રિયાલોલઃ શિવસાયુજ્યસાધકઃ ।
શિશિરેષ્ટઃ શિશિરદઃ શિશિરર્તુપ્રિયઃ શિશુઃ ॥ ૧૧૫॥

શિશુપ્રિયઃ શિશુત્રાતા શિશુભાષી શિશૂત્સવઃ ।
શિશુપાલનતાત્પર્યઃ શિશુપૂજ્યઃ શિશુક્ષમઃ ॥ ૧૧૬॥

શિશુપાલક્રોધહરઃ શિશુશક્તિધરસ્તુતઃ ।
શિશુપાલઘ્નવિનુતઃ શિશુપાલનચેષ્ટિતઃ ॥ ૧૧૭॥

શિશુચાન્દ્રાયણપ્રીતઃ શિશુભાવાવનપ્રભુઃ ।
શીકરપ્રણયઃ શીકરાઙ્ગઃ શીઘ્રશ્ચ શીઘ્રશઃ ॥ ૧૧૮॥

શીઘ્રવેદી શીઘ્રગામી શીઘ્રયોદ્ધા ચ શીઘ્રધીઃ ।
શીઘ્રકપ્રિયકૃચ્છીઘ્રી શીઘ્રદાતા ચ શીઘ્રભૃત્ ॥ ૧૧૯॥

શીતાલઙ્કરણઃ શીતજલાસ્વાદનતત્પરઃ ।
શીતઃ શીતકરઃ શીતપુષ્પધારી ચ શીતગુઃ ॥ ૧૨૦॥

શીતપ્રિયઃ શીતભાનુઃ શીતરશ્મિશ્ચ શીતલઃ ।
શીતાપ્રભઃ શીતલાઢ્યઃ શીતાંશુઃ શીતવીર્યકઃ ॥ ૧૨૧॥

શીતલાઙ્ગઃ શીતસહઃ શીતાદ્રિનિલયપ્રિયઃ ।
શીત્પુટભ્રુઃ શીતનેત્રઃ શીર્ણાઙ્ઘ્રિભયનાશનઃ ॥ ૧૨૨॥

શીતાત્મગિરિસઞ્ચારી શીર્ણપર્ણસુમોત્કરઃ ।
શીભઙ્ગઃ શીર્ષણ્યધરઃ શીર્ષરક્ષોઽથ શીલવાન્ ॥ ૧૨૩॥

શીલજ્ઞઃ શીલદઃ શીલપાલકઃ શીલવત્પ્રભુઃ ।
શુકતુણ્ડનિભાપાઙ્ગઃ શુકવાહનસોદરઃ ॥ ૧૨૪॥

શુકપ્રિયફલાસ્વાદઃ શુકવાક્યપ્રિયઃ શુભી ।
શુકવાહપ્રિયઃ શુક્તિકાજહારઃ શુકપ્રિયઃ ॥ ૧૨૫॥

શુક્રઃ શુક્રભુગારૂઢભૂતઃ શુક્રપ્રપૂજિતઃ ।

શુક્રશિષ્યાન્તકઃ શુક્રવર્ણઃ શુક્રકરઃ શુચિઃ ॥ ૧૨૬॥

શુક્લઃ શુક્લનુતઃ શુક્લી શુક્લપુષ્પશ્ચ શુક્લદઃ ।
શુક્લાઙ્ગઃ શુક્લકર્મા ચ શુચિભૂમિનિવાસકઃ ॥ ૧૨૭॥

શુચિપ્રદઃ શુચિકરઃ શુચિકર્મા શુચિપ્રિયઃ ।
શુચિરોચિઃ શુચિમતિઃ શુણ્ઠીગુડજલાદરઃ ॥ ૧૨૮॥

શુદ્ધઃ શુદ્ધફલાહારઃ શુદ્ધાન્તપરિપાલકઃ ।
શુદ્ધચેતાઃ શુદ્ધકર્મા શુદ્ધભાવોઽથ શુદ્ધિદઃ ॥ ૧૨૯॥

શુભઃ શુભાઙ્ગઃ શુભકૃચ્છુભેચ્છઃ શુભમાનસઃ ।
શુભભાપી શુભનુતઃ શુભવર્ષી શુભાદરઃ ॥ ૧૩૦॥

શુભશીલઃ શુભપ્રીતઃ શુભંયુઃ શુભપોષકઃ ।
શુભઙ્કરઃ શુભગણઃ શુભાચારઃ શુભોત્સવઃ ॥ ૧૩૧॥

શુભાદરઃ શુભોદારઃ શુભાહારઃ શુભાવહઃ ।
શુભાન્વિતઃ શુભહિતઃ શુભવર્ણઃ શુભામ્બરઃ ॥ ૧૩૨॥

શુભભક્તઃ શુભાસક્તઃ શુભયુક્તઃ શુભેક્ષણઃ ।
શુભ્રઃ શુભ્રગણઃ શુભ્રવસ્ત્રઃ શુભ્રવિભૂષણઃ ॥ ૧૩૩॥

શુભવિધ્વંસિનીભૂતઃ શુલ્કાદાનનિપાતકઃ ।
શુષ્મદ્યુતિઃ શુષ્મિસખઃ શુશ્રૂષાદૂતશઙ્કરઃ ॥ ૧૩૪॥

શૂરઃ શૂરાશ્રિતઃ શૂરગણઃ શૂરચમૂપતિઃ ।
શૂરપ્રવરસન્દોહઃ શૂરભક્તશ્ચ શૂરવાન્ ॥ ૧૩૫॥

શૂરસેનઃ શૂરનુતઃ શૂરપાલશ્ચ શૂરજિત્ ।
શૂરદેવઃ શૂરવિભુઃ શૂરનેતા ચ શૂરરાટ્ ॥ ૧૩૬॥

શૂલપાણિયુતઃ શૂલી શૂલયુદ્ધવિશારદઃ ।
શૂલિનીપ્રિયકૃચ્છૂલવિત્રસ્તરિપુમણ્ડલઃ ॥ ૧૩૭॥

શૃઙ્ગારખેલઃ શૃઙ્ગારગાત્રઃ શૃઙ્ગારશેખરઃ ।
શૃઙ્ગારજટિલઃ શૃઙ્ગાટકસઞ્ચારકૌતુકઃ ॥ ૧૩૮॥

શૃઙ્ગારભૂષણઃ શૃઙ્ગારયોનિજનનાર્ભકઃ ।
શેમુષીદુઃખહન્તા ચ શેખરીકૃતમૂર્ધજઃ ॥ ૧૩૯॥

શેષસ્તુતઃ શેષપાણિઃ શેષભૂષણનન્દનઃ ।
શેષાદ્રિનિલયપ્રીતઃ શેષોદરસહોદરઃ ॥ ૧૪૦॥

શૈલજાપ્રિયકૃત્કર્મા શૈલરાજપ્રપૂજિતઃ ।
શૈલાદિવિનુતઃ શૈવઃ શૈવશાસ્ત્રપ્રચારકઃ ॥ ૧૪૧॥

શૈવધીરઃ શૈવવીરઃ શૈવશૂરશ્ચ શૈવરાટ્ ।
શૈવત્રાણઃ શૈવગણઃ શૈવપ્રાણશ્ચ શૈવવિત્ ॥ ૧૪૨॥

શૈવશાસ્ત્રઃ શૈવશાસ્ત્રાઢ્યઃ શૈવભૃચ્છૈવપાલકઃ ।
શૈવદક્ષઃ શૈવપક્ષઃ શૈવરક્ષોઽથ શૈવહૃત્ ॥ ૧૪૩॥

શૈવાઙ્ગઃ શૈવમન્ત્રજ્ઞઃ શૈવતન્ત્રશ્ચ શૈવદઃ ।
શૈવમૌની શૈવમતિઃ શૈવયન્ત્રવિધાયકઃ ॥ ૧૪૪॥

શૈવવ્રતઃ શૈવનેતા શૈવજ્ઞઃ શૈવસૈન્યકઃ ।
શૈવનન્દ્યઃ શૈવપૂજ્યઃ શૈવરાજ્યોઽથ શૈવપઃ ॥ ૧૪૫॥

શોણાપાઙ્ગઃ શોણનખઃ શોણરત્નવિભૂષિતઃ ।
શોકઘ્નઃ શોભનાસ્ત્રશ્ચ શોધકઃ શોભનપ્રદઃ ॥ ૧૪૬॥

શોષિતારિઃ શોષહારી શોષિતાશ્રિતરક્ષકઃ ।
શૌરીડ્યઃ શૌરિવરદઃ શૌરિદ્વિટ્પ્રાણહારકઃ ॥ ૧૪૭॥

શ્રદ્ધાધારશ્ચ શ્રદ્ધાલુઃ શ્રદ્ધાવિત્પરિપાલકઃ ।
શ્રવણાનન્દજનકઃ શ્રવણાભરણોજ્જ્વલઃ ॥ ૧૪૮॥

શ્રીદઃ શ્રીદપ્રિયઃ શ્રીદસ્તુતઃ શ્રીદપ્રપૂજિતઃ ।
શ્રુતિજ્ઞઃ શ્રુતિવિત્પૂજ્યઃ શ્રુતિસારઃ શ્રુતિપ્રદઃ ॥ ૧૪૯॥

શ્રુતિમૌલિનુતપ્રેમડિમ્ભઃ શ્રુતિવિચારકઃ ।
શ્લાઘ્યઃ શ્લાઘાપરઃ શ્લાઘ્યગણઃ શ્લાઘ્યગુણાકરઃ ॥ ૧૫૦॥

શ્વેતાઙ્ગશ્ચ શ્વેતગજરથઃ શ્વેતસુમાદરઃ ।
શ્રીધૃક્ શ્રીધરદામ્પત્યસાર્થસમ્મોહનાકૃતિઃ ॥ ૧૫૧॥

શ્રીકામાશ્રિતસન્દોહકૈરવાનન્દચન્દ્રમાઃ ।
ઇતીદં શાસ્તૃદેવસ્ય શિવવિષ્ણુસ્વરૂપિણઃ ॥ ૧૫૨॥

નામ્નાં સહસ્રં દિવ્યાનાં શાદીનાં સમ્પ્રકીર્તિતમ્ ।
ય ઇદં શ ृણુયાન્નિત્યં પ્રપઠેચ્ચ પ્રયત્નતઃ ।

નાશુભં પ્રાપ્નુયાત્કિઞ્ચિત્સોઽમુત્રેહ ચ માનવઃ ॥ ૧૫૩॥

ઇતિ શ્રીશાસ્તૃશવર્ણસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Sivakumar Thyagarajan Iyer shivakumar24 at gmail.com

Proofread by Sivakumar Thyagarajan Iyer, PSA Easwaran

---

*ShastrishavarNa sahasranAmastotram*

pdf was typeset on July 10, 2021

Please send corrections to *sanskrit@cheerful.com*